"चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा। प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम्" रघुः।

**हरित्** पु० हृ-इति। १नीलपीतमिश्रितवर्णे (पातारङ्ग पलाशवर्णे च अमरः २तद्वति त्रि०। ३सूर्य्याश्वे त्रिका० ४मुद्गे हेमच०। ५सिंहे ६सूर्य्ये ७विष्णौ च पु० ८दिशि स्त्री अमरः। ९हरिद्रायां राजनि० १०तृणे न० मेदि०।

**हरित्पर्ण** न० हरित् पर्णमस्य। मूलके राजनि०।

**हरित** पु० हृ-इतच्। १सिंहे २मन्थानतृणे राजनि० ३हरिद्वर्णे ४तद्वति त्रि० अमरः स्त्रियां ङीप् तस्य नश्च। ५दूर्वायां मेदि० ६जयन्त्यां ७हरिद्रायां ८कपिलद्राक्षायां ९पाच्यां १०नीलदूर्वायाञ्च स्त्री राजनि० टाप्। ११स्थौणेयके न० राजनि०। [शाके न० राजनि०

**हरितक** न० हरितेन वर्णेन कायति प्रकाशते कै-क।

**हरितपत्रिका** स्त्री हरितं पत्रं यस्याः कप् कापि अत इत्त्वम्। पाच्यां राजनि०।

**हरितशाक** पु० हरितं शाकमस्य। शोभाञ्जने राजनि०।

**हरिताल** न० हरिवर्णस्य पीतवर्णस्य तालः प्रतिष्ठा यत्र। १पीतवर्णे उपधातुभेदे "स हरितालसमानवर्णांशुकः" माघः। २पीतवर्णपक्षिभेदे पुंस्त्री० राजनि०। स्त्रियां ङीष्। स्वार्थे क। हरितालं न० अमरः।

"हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम्। तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम्। स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत्। पत्राख्यं तालकं विद्याद्गुणाढ्यं तद्रसायनम्। निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु। स्त्रीपुष्पहारकं स्वल्पगुणं तत् पिण्डतालकम्। हरति च हरितालञ्चारुतां देहजाताम् सृजति च बहुतापामङ्गसङ्कोचपीडाम्। वितरति कफवातौ कुष्ठरोगं विदध्यादिदमशितमशुद्धम् मारितञ्चाप्यसम्यक्"। "तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके पचेत्। दोलायन्त्रेण यामैकं ततः कूष्माण्डजद्रवैः। तिलतैले पचेद्यामं यामञ्च त्रिफलाजले। एवं यन्त्रे चतुर्यामं पक्वं शुद्ध्यति तालकम्"। अथ तालस्य मारणविधिः "सदलं तालकं शुद्धं पौनर्नवरसेन तु। खल्वे विमर्दयेदेकं दिनं पश्चाद्विशोषयेत्। ततः पुनर्नवाक्षारैः स्थाल्यामूर्द्धं प्रपूरयेत्। तत्र तद्गोलकं धृत्वा पुनस्तेनैव पूरयेत्। आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे। स्थालीं चुल्ल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत्। दिनान्यन्तरशून्यानि पञ्च वह्निं प्रदापयेत्। एवं तन्म्रियते तालं मात्रा तस्यैकरक्तिका। अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत्"। एवं शोधितस्य मारितस्य तालकस्य गुणाः।

"हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्। कण्डूकुष्ठास्यरोगास्रकफपित्तकचव्रणान्"। "तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम्। शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुषम्" भावप्र०।

हरितालखगमांसगुणाः "हरितालोऽल्पविट्कः स्यात् कषायो मधुरो लघुः। रक्तपित्तप्रशमनस्तृषाघ्नो वातकोपनः" राजनि०।

**हरितालिका** स्त्री हरेस्तालो हस्ततालो यस्यां कप् अत इत्त्वम्। १सौरभाद्रशुक्लचतुर्थ्याम् हरितवर्णाय अलति पर्य्याप्नोति अल-ण्वुल्। २दूर्वायाम् त्रिका०। अण् ङीप्। हरिताली दूर्वायाम् सा च आकाशरेखायां मेदि० खड्गलतायाम् हरितालिकायाञ्च।

"भाद्रे मासि सिते पक्षे बहुदैवतसंयुता। हरिताली चतुर्थी स्यात् सर्वाणीप्रीतिदा सदा। भाद्रे मासि सिते पक्षे चतुर्थ्यां स्याभियोगतः। ददाति किल्बिषं घोरं दृश्यश्चन्द्रो न संशयः। कश्चित्तानलक्षेषु हरौ सूर्य्ये चतुर्थिका। हरिताली समाख्याता रुद्राणीप्रीतिदा सदा" राजमार्त्तण्डः

**हरिताश्म** न० हरितवर्णमश्म अश्मेव वा अच्समा०(पेरोजा) १मणिभेदे २तुत्थे (तुँते) उपधातुभेदे च राजनि०।

**हरिदर्भ** पु० हरिर्हरिद्वर्णो दर्भः। हरिद्वर्णे कुशे अमरः।

**हरिदश्व** पु० हरिन्नामकोऽश्वो यस्य। १सूर्य्ये २अर्कवृक्षे च अमरः।

**हरिदैव** पु० हरिर्दैवोऽधिष्ठाता अस्य। श्रवणानक्षत्रे।

**हरिद्गर्भ** पु० हरिद्वर्णो गर्भो यस्य। हरिद्वर्णे कुशे राजनि०।

"दर्भौ द्वौ च गुणे तुल्यौ तथापि च सितोऽधिकः। यदि श्वेतकुशाभावस्तत्परं योजयेद्भिषक्" राजनि०।

"दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम्। मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक् प्रदरास्रजित्" भावप्र०। तन्मूलगुणाः 'कुशमूलं हिमं रुच्यं मधुरं पित्तनाशनम्। रक्तज्वरतृषाश्वासकामलादोषमोक्षकृत्" राजनि०।

**हरिद्रव** पु० हरिवर्णः पिङ्गलवर्णो द्रव द्रव। नागकेशररजसि त्रि०।

**हरिद्रा** स्त्री हरिं पीतवर्णं द्रवति द्रु-गतौ ड। स्वनामख्याते ओषधिभेदे।